उक्तानुक्तनिमित्तत्वात् द्विधा सा परि-
कीर्त्तिता ॥”

उक्तहेतौ यथा,—
“धनायासक्लिष्टं मध्यमपृष्ठतरवे हन्तौ ।
अभूवन्ममनोहारि वपुर्वयसि सुभ्रुवः ॥”
अनुक्तहेतौ यथा,—
“स एव त्रीणि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं तस्य शम्भुना न हृतं बलम् ॥”
इति साहित्यदर्पणे १० परिच्छेदे ॥
(पालनम् । यथा, भागवते । ४ । ८ । २० ।
“यस्याङ्घ्रिपद्मं परिचर्य्य विश्व-
विभावनायात्तगुणाभिपत्तेः ॥”)

विभावरी, स्त्री, रात्रिः । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ३ । २०७ ।
“प्रभातायां विभावर्य्यां यथास्थानस्थितो नृपः ।
आकार्य्यतां मातृगुप्त इति चत्वारमादिशत् ॥”
मन्दारविद्याधरकन्या । यथा, मार्कण्डेये ।६३। १४ ।
“मन्दारविद्याधरजा सखी मम विभावरी ॥”
सुमेरूत्तरस्था पुरी । यथा, भागवते ।७५।२१।७।
“उत्तरतः सौम्यां विभावरीं नाम ॥”)
हरिद्रा । कुट्टनी । वक्रयोषित् । विवादवल्लभा । इति मेदिनी । रे, २८६ ॥ मौखर्य्यनिरतस्त्री । इति शब्दरत्नावली ॥ मेदाद्रुचः । इति रत्नमाला ॥

विभावसुः, पुं, (विभा प्रभा एव वसु धनमस्ति यस्य ।) सूर्य्यः । (यथा, महाभारते । १ । ८६ । ७ ।
“वर्द्धनः कुरुवंशस्य विभावसुसमद्युतिः ॥”)
अर्कवृक्षः । अग्निः । (यथा, महाभारते । ३ । ६८ । ७ ।
“निवृतां धूमजालेन प्रभामिव विभावसोः ॥”)
चित्रकवृक्षः । इत्यमरः ॥ चन्द्रः ॥ हारभेदः ! इति हेमचन्द्रः ॥ (वसुपुत्रविशेषः । यथा, भागवते । ६ । ६ । १०,१६ ।
“वसवोऽष्टौ वसोः पुत्त्रास्तेषां नामानि मे शृणु ।
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वास्तुर्विभा-
वसुः ।
विभावसोरसूतोषा व्युष्टं रोचिषमातपम् ॥”
सुरासुरपुत्त्रः । यथा, तत्रैव । १० । ५९ । १२ ।
“ताम्रोऽन्तरिक्षः श्रवणो विभावसुः
वसुर्नभस्वानरुणश्च सप्तमः ॥”
दनुपुत्त्रोऽसुरविशेषः । यथा, तत्रैव ।६।६।३०।
“त्रिमूर्द्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः ॥”)

विभावितः, त्रि, विचिन्तितः । विशेषेण उत्पादितः । विशेषेण प्रापितः । विमिश्रयितः । इति ण्यन्तभूधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, शिशुपालवधे । १ । २ ।
“चयस्त्विषामित्यवधारितं पुरा
ततः शरीरीति विभाविताकृतिः ॥”)

विभाषा, स्त्री, (विकल्पत्वेन भाष्यते इति । भाष्+“गुरोश्च हलः ।” ३।३।१०३ । इत्यः । ततष्टाप् ।) विकल्पः । यथा । द्वयोर्विभाषयोर्मध्ये विधिर्नित्यः । इति मुग्धबोधव्याकरणम् ॥ (“नवेति विभाषा ॥” इति पाणिनिः ।१।१।४४॥)

विभिन्नः, त्रि, (वि+भिद्+क्तः ।) विभक्तः । विदीर्णः । यथा,—
“गदापरशुखड्गैश्च चक्रतोमरशायकैः ।
विभिन्ने वेदना या हि क्षुधया सापि निर्ज्जिता ॥”
इति इतिहाससमुच्चयः ॥
(विसङ्गतः । यथा, शिशुपालवधे । १ । ५५ ।
“विभिन्नशङ्खः कलुषीभवन्मुहु-
र्मदेन दन्तीव मनुष्यधर्म्मणः ॥”)

विभीतकः, पुं, वृक्षविशेषः । बहेड़ा इति भाषा । तत्पर्य्यायः । अक्षः २ तुषः ३ कर्षफलः ४ भूतवासः ५ कलिद्रुमः ६ । इत्यमरः ॥ कल्पवृक्षः ७ संवर्त्तः ८ । इति रत्नमाला ॥ तैलफलः ९ भूतावासः १० संवर्त्तकः ११ वासन्तः १२ कलिवृक्षः १३ बहेडुकः १४ हार्य्यः १५ विषघ्नः १६ अनिलघ्नः १७ कासघ्नः १८ । (यथा, महाभारते । ३ । ६४ । ५ ।
“प्रियालतालखर्ज्जूरहरीतकविभीतकैः ॥”)
अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । उष्णत्वम् । कफापहत्वम् । चक्षुष्यत्वम् । पलितघ्नत्वम् । विपाके मधुरत्वञ्च ॥ तन्मज्जगुणाः । तृष्णाच्छर्द्दिकफवातहरत्वम् । लघुत्वम् । मधुरत्वम् । मदकारित्वञ्च ॥ तत्तैलगुणाः । स्वादुत्वम् । हिमत्वम् । केश्यत्वम् । गुरुत्वम् । पित्तानिलार्त्तिनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च । अथ विभीतकनामानि गुणाश्च ।
“विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलश्च यः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ॥
विभीतकं स्वादुपाकं कषायं कफपित्तनुत् ।
उष्णवीर्य्यं हिमस्पर्शं भेदनं कासनाशनम् ।
रूक्षं नेत्रहितं केश्यं कृमिवैस्वर्य्यनाशनम् ॥
विभीतमज्जा तृट्छर्द्दिकफवातहरो लघुः ।
कषायो मदकृच्चाथ धात्रीमज्जापि तद्गुणाः ॥”
इति भावप्रकाशः ॥ * ॥
अन्यच्च ।
“विभीतं भेदि तीक्ष्णोष्णं वैस्वर्य्यं कृमिनाशनम् ।
चक्षुष्यं स्वादुपाकञ्च कषायं कफपित्तनुत् ॥”
इति राजवल्लभः ॥ * ॥
अस्य कलिद्रुमत्वकारणं यथा,—
पुलस्त्य उवाच ।
“ततो गतेषु देवेषु ब्रह्मलोकं प्रति द्विज ।
त्रैलोक्यं पालयामास बलिर्धर्म्मान्वितः सदा ॥
कलिस्तदा धर्म्मयुतं जगद्दृष्ट्वा कृते यथा ।
ब्रह्माणं शरणं भेजे स्वभावस्य निषेधनात् ॥
प्रणिपत्य तमाहाथ तिष्यो ब्रह्माणमीश्वरम् ।
मम स्वभावो बलिना नाशितो देवसत्तम ॥
तं प्राह भगवान् योगी स्वभावो जगतोऽपि हि ।
न केवलं हि भवतो हृतस्तेन बलीयसा ॥
पश्याद्य तिष्य देवेन्द्रं वरुणञ्च समागतम् ।
भास्करोऽपि हि दीनत्वं प्रयातो हि बलाद्बलेः ॥
इत्येवमुक्तो देवेन ब्रह्मणा कलिरव्ययः ।
दीनान् दृष्ट्वा च शक्रादीन् विभीतकवनं गतः ॥”
इति वामने १७ अध्यायः ॥
(अन्यच्च । यथा, महाभारते ३।७२ अध्याये ।
“एवमुक्त्वा ददौ विद्यामृतुपर्णो नलाय वै ।
तस्याक्षहृदयाज्ञस्य शरीरान्निःसृतः कलिः ॥”
“तं शप्तुमैच्छत् कुपितो निषधाधिपतिर्नलः ।
तमुवाच कलिर्भीतो वेपमानः कृताञ्जलिः ॥
कोपं संयच्छ नृपते कीर्त्तिं दास्यामि ते पराम् ॥”
“एवमुक्तो नलो राजा न्ययच्छत् कोपमात्मनः ।
ततो भीतः कलिः क्षिप्रं प्रविवेश विभी-
तकम् ॥”
“विभीतकश्चाप्रशस्तः संवृत्तः कलिसंश्रयात् ॥”)

विभीषणः, पुं, (विभीषयतीति । वि+भीषि+“नन्दिग्रहिपचादिभ्यो” ३ । १ । १३४ । इति ल्युः ।) रावणभ्राता । इति रामायणम् ॥ (यथा, भागवते । ४ । १ । ३४ ।
“रावणः कुम्भकर्णश्च तथान्यस्तो विभीषणः ।
पुलहस्य गतिर्भार्य्या त्रीनसूत सती सुतान् ॥”)
नलतृणम् । इति राजनिर्घण्टः ॥ भयानके त्रि ॥ (यथा, ऋग्वेदे । ५ । ३४ । ६ ।
“इन्द्रो विश्वस्य दमिता विभीषणः ॥”
“विभीषणः भयजनकः ।” इति तद्भाष्ये सायणः ॥)

विभीषिका, स्त्री, (विभीषा+स्वार्थे कन् । स्त्रियां टाप् अत इत्वञ्च ।) भयप्रदर्शनम् । यथा,—
“कृत्वा शक्रविभीषिकां कतिपयग्रामेषु दीनाः
प्रजाः
मयूरो विटजल्पितैरपहृताः चौरीसुजस्ते
ऽखिलाः ।
विद्वांसोऽपि वयं परं त्रिजगतां सर्गस्थिति-
व्यापदा-
मीशस्तत्परिचर्य्यया न गणितो यैरेष नारा-
यणः ॥”
इति शान्तिशतकम्

विभुः, पुं, (वि+भू+“विप्रसंभ्यो ड्वसंज्ञायाम्” ३ । २ । १८० । इति डुः ।) प्रभुः । (यथा, शिशुपालवधे ।
“विभुर्विभक्तावयवं पुमानिति
क्रमादमुं नारद इत्यबोधि सः ॥”)
सर्व्वगतः । शङ्करः । (यथा, महाभारते ।१३। १७ । १६ ।
“त्रिजटश्चीरवासाश्च रुद्रः सेनापतिर्विभुः ॥”)
ब्रह्मा । इति मेदिनी । भे, ७ । भृत्यः । इति त्रिकाण्डशेषः ॥ विष्णुः । इति शब्दमाला ॥ (यथा, महाभारते । १३ । १४९ । १०७ ।
“विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥”
जीवात्मा । यथा,—
“न शक्यश्चक्षुषा द्रष्टुं देहे सूक्ष्मतमो विभुः ।
दृश्यते ज्ञानचक्षुर्भिस्तपश्चक्षुर्भिरेव च ॥”
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ।)
नित्यः । अर्हन् । इति हेमचन्द्रः ॥